# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (३)

०१.०८.२०११

# पुनरावर्तनम्

- हकारान्ताः पुंलिङ्गाः
- पदान्ते ‘हो ढः’ इति ढत्वम् ।
- लिट्/लिड्, लिड्भ्याम् ।
- दकारादीनां धातूनां ‘दादेर्धातोर्घः’ इति घत्वम् ।
- धुक्/धुग्, धुग्भ्याम् ।
- द्रुह्-मुह्-ष्णुह्-ष्णिहाम् वा घत्वम् । पक्षे ढत्वम् ।
- मुक्/मुग्/मुट्/मुड्, मुग्भ्याम्/मुड्भ्याम्

- ‘एकाचो बशो भष् झषन्तस्य स्ध्वोः’
- धातोः अवयवः यः एकाच्, तदन्तस्य झषन्तस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च ।
- ‘दुघ्’ इति स्थिते दकारस्य स्थाने धकारादेशे ‘धुघ्’ इति भवति ।

# हकारान्तानां प्रयोगाः

- कृष्णाङ्घ्रिपद्ममधुलिण्न पुनर्विसृष्ट-मायागुणेषु रमते वृजिनावहेषु । (श्रीमद्भागवतम् - ६.३.३३)
- मधुलिड् - हकारान्तः पुंलिङ्गः 'मधुलिह्' शब्दः, प्रथमाविभक्तिः, एकवचनम् । भ्रमरः इत्यर्थः ।
- सुप्रत्ययः, सुलोपः, 'हो ढः' इति ढत्वम्, जश्त्वम् ।
- एकः शब्दः सुष्ठु ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति (महाभाष्यम् - पस्पशाह्निकम्)
- कामधुग् - हकारान्तः पुंलिङ्गः 'कामदुह्' शब्दः, प्रथमाविभक्तिः, एकवचनम् ।
- सुप्रत्ययः, सुलोपः, 'दादेर्धातोर्घः' इति घत्वम्, भष्भावः, जश्त्वम् ।

- कामात्मा प्राज्ञमानी च मित्रध्रुक् सर्वशङ्कितः ।
  अकर्ता चाकृतज्ञश्च त्यक्तधर्मः प्रियानृतः ॥ (महाभारतम् - ५.५४.९०.०.४)
- मित्रध्रुक् - हकारान्तः पुंलिङ्गः 'मित्रद्रुह्' शब्दः, प्रथमाविभक्तिः, एकवचनम् । सुहृद्-द्रोही इत्यर्थः ।
- सुलोपः, 'वा द्रुह...' इति वा घत्वम्, भष्भावः, जश्त्वम्, चर्त्वम् ।
- तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ।
  अथ वाऽस्य पदाम्भोजमकरन्दलिहां सताम् ॥ (श्रीमद्भागवतम् - १.१६.६)
- मकरन्दलिहाम् - हकारान्तः पुंलिङ्गः 'मकरन्दलिह्' शब्दः, षष्ठीविभक्तिः, बहुवचनम् ।

- हकारान्तः पुंलिङ्गः ‘तुरासाह्’ शब्दः ।
- तुरम् = वेगं सहते इत्यर्थे ‘षह मर्षणे’ धातोः णिजन्तात् क्विप् ।
- तुराषाट् = इन्द्रः ।

- तुरासाह् (सुँ) स्
- तुरासाह् ('हल्ङ्याब्भ्यो...' - ६.१.६८ - इति सुलोपः)
- तुरासाढ् ('हो ढः' - ८.२.३१ - इति हकारस्य ढत्वम्)
- तुरासाड् ('झलां जशोऽन्ते' - ८.२.३९ - इति जश्त्वम्)

# ३३५. सहेः साडः सः (८.३.५६)

- पदत्रयम् ।
- ‘अपदान्तस्य मूर्धन्यः’ (८.४.५५) इति अधिक्रियते ।
- साड्-रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात् ।

- तुरासाड्
- तुराषाड्   (‘सहेः साडः सः’ - ८.३.५६ - इति सस्य षः)
- तुराषाट्    (‘वाऽवसाने’ - ८.४.५६ - इति चर्त्वम्)

- तुरासाहौ, तुरासाहः ।

- तुरासाह्  भ्याम्
- तुरासाढ् भ्याम्   ('हो ढः' - ८.२.३१ - इति ढत्वम्)
- तुरासाड् भ्याम्            ('झलां जशोऽन्ते' - ८.२.३९ - इति जश्त्वम्)
- तुराषाड् भ्याम्    ('सहेः साडः सः' -  ८.४.५६ - इति षत्वम्)

- तुरं सहते इत्यर्थे 'छन्दसि सहः' (३.२.६३) इति ण्विः ।
- लोके तु साहयतेः क्विप् ।
- 'अन्येषामपि दृश्यते' (६.३.१३७) इति पूर्वपदस्य दीर्घः ।

# हकारान्तः पुँल्लिङ्गः तुरासाह्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | तुराषाट्/तुराषाड् | तुरासाहौ | तुरासाहः |
| | हे तुराषाट्/हे तुराषाड् | हे तुरासाहौ | हे तुरासाहः |
| | तुरासाहम् | तुरासाहौ | तुरासाहः |
| तृतीयाविभक्तिः | तुरासाहा | तुराषाड्भ्याम् | तुराषाड्भिः |
| चतुर्थीविभक्तिः | तुरासाहे | तुराषाड्भ्याम् | तुराषाड्भ्यः |
| पञ्चमीविभक्तिः | तुरासाहः | तुराषाड्भ्याम् | तुराषाड्भ्यः |
| षष्ठीविभक्तिः | तुरासाहः | तुरासाहोः | तुरासाहाम् |
| सप्तमीविभक्तिः | तुरासाहि | तुरासाहोः | तुराषाट्त्सु/तुराषाट्सु |

हलादिषु प्रत्ययेषु 'हो ढः' इति ढत्वम् । जश्त्वम् । सस्य षत्वम्

सुपि ढत्वजश्त्वषत्वयोः कृतयोः वा धुडागमः

# वकारान्ताः पुंलिङ्गाः

- वकारान्तः पुंलिङ्गः 'सुदिव्' शब्दः ।
- शोभना द्यौः यस्यः सः इति बहुव्रीहिः ।
- सुदिव् (सुँ) स्

# ३३६. दिव औत् (७.१.८४)

- पदद्वयम् । दिवः, औत् ।
- ‘सावनडुहः’ (७.१.८२) इत्यतः ‘सौ’ इत्यनुवर्तते ।
- दिविति प्रातिपदिकस्य औत् स्यात् सौ परे ।

- सुदिव्  (सुँ) स्
- सुदि  औ     स्  (‘दिव औत्’ इति औत्त्वम्)
- सुद्यौ   स्    (‘इको यणचि’ - ६.१.७७)
  - औकारस्य स्थानिवद्भावेन वकारत्वे हलन्तत्वात् ‘हल्ङ्याब्भ्यः..’ इति सुलोपो भवति वा इति प्रश्ने,

- अल्विधित्वेन स्थानिवत्त्वाभावाद् ‘हल्ङ्याप्...’ इति सुलोपो न ।

- सुद्यौ  स्
- सुद्यौ  र्  (‘ससजुषो रुः’ - ८.२.६६ - इति रुत्वम्)
- सुद्यौः  (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)

- सुदिवौ, सुदिवः ।
- सुदिवम्, सुदिवौ ।

# ३३७. दिव उत् (६.१.१३१)

- पदद्वयम् । दिवः, उत् ।
- 'एङः पदान्तादति' (६.१.१०९) इत्यतः 'पदान्ताद्' इति अनुवर्तते ।
- दिवः अन्तादेशः उकारः स्यात् पदान्ते ।

- सुदिव् भ्याम्
- सुदि उ भ्याम्  ('दिव उत्' - ६.१.१३१ - इति उकारादेशः)
- सुद्युभ्याम्  ('इको यणचि' - ६.१.७७ - इति यण्)
- सुद्युभिः इत्यादि ।

# वकारान्तः पुँल्लिङ्गः सुदिव्-शब्दः

सौ परे 'दिव औत्' इति औकारादेशः

हलादिषु प्रत्ययेषु 'दिव उत्' इति उकारादेशः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | सुद्यौः | सुदिवौ | सुदिवः |
| क्तिः | हे सुद्यौः | हे सुदिवौ | हे सुदिवः |
| द्वितीयाविभक्तिः | सुदिवम् | सुदिवौ | सुदिवः |
| | सुदिवा | सुद्युभ्याम् | सुद्युभिः |
| | सुदिवे | सुद्युभ्याम् | सुद्युभ्यः |
| | सुदिवः | सुद्युभ्याम् | सुद्युभ्यः |
| षष्ठीविभक्तिः | सुदिवः | सुदिवोः | सुदिवाम् |
| सप्तमीविभक्तिः | सुदिवि | सुदिवोः | सुद्युषु |